वर्षम्-०४ अङ्कः-०४ शोधज्योतिः
जनवरी-दिसम्बर, २०२२ ISSN-2350-0700

पुराणानामध्ययने सर्वेषां समानाधिकारः

डॉ. पङ्कजकुमारः रावलः[१]

प्रस्तावना

संशोधनस्य विषयोऽयं वर्तते यत् पुराणानामध्ययने सर्वेषां समानाधिकारः इत्यत्र किं नाम पुराणमिति जिज्ञासायां सत्यां निगद्यते यत् पुरति अग्रे गच्छतीति पुरा इति तुदादिगणपठितात् पुर अग्रगमने इति धातोःऔणादिके का प्रत्यये कृते पुराशब्दो निष्पद्यते, योऽव्ययो मन्यते। पुरातनः, प्रतनम्, पुरातनम्, चिरन्तनमित्यस्य समानार्थकाः शब्दाः विद्यन्ते[२] कोशग्रन्थानुगुणं सः शब्दः त्रिषु अर्थेषु प्रयुक्तो भवति तद्यथा- अतीतसमये, प्रबन्धे, सङ्कटे चेति। अपरः यथा – पुरा भवः पुराणमिति विग्रहे पुरा अव्ययात् सायं चिरं प्राह्णेप्रगेऽव्ययेभ्यष्टयुट्युलौ तुट्[३] अनेन सूत्रेण ट्यु प्रत्ययो भूत्वा व्याकरणप्रक्रियायां सत्यामयं शब्दः सिद्धो भवति। अपरा व्युत्पत्तिः यथा पुरा पुरतनम् अनीति जीवयति बोधयति इति पुराणं ग्रन्थविशेषः पुरा पूर्वकात् आदादिकात् अण् प्राणने इति धातोरचि णत्वे च कृते शब्दोऽयं निष्पद्यते।

इति तु व्याकरणशास्त्रानुसारं व्युत्पत्तिः जाता। किन्तु व्यासविरचितेषु पुराणेषु अपि पुराणशब्दस्यार्थः व्युत्पत्तिश्च अवलोक्यते। यथा- वायु-पुराणे, ब्रह्माण्ड-पुराणे, मत्स्य-पुराणे, महाभारते चेति। तद्विहाय सायणाचार्येण, यास्काचार्येण, पाणिनिमुनिना, मधुसूदन-सरस्वतिना, राजशेखरेण चापि व्युत्पत्तिः अर्थश्च प्रोक्तः। यथा- पद्मपुराणे- पुरा अर्थेषु आनयति इति पुराणमिति। वायुपुराणे यथा- पुरा परम्परां वक्ति पुराणं तेन वै स्मृतम्। मत्स्ये यथा- पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः। महाभारते यथा – पुराणमाख्यानं पुराणमिति। अर्थात् प्रचीनम् आख्यानम् एव पुराणम्। महर्षिणा यास्काचार्येण स्वकीये निरुक्तग्रन्थे पुराणशब्दस्य निवर्चनं कुर्वता निगदितमस्ति यत् पुराणं कस्मात् ? तस्योत्तरे भणति यथा – पुरा नवं भवति इति पुराणम्।[४] कथनस्याशयोऽयं विद्यते यत् पुराणं कस्मादुच्यते ? अतोऽत्र यत् कदापि पूर्वं नवं स्यात्। निरुक्ते यास्काचार्यस्यैवं प्रकारेण निर्वचनेन पुराणे नवीनतायाः भावो न विद्यते किन्तु पुराणशब्दस्यार्थः प्राचीन एव अस्ति। मधुसूदनसरस्वतिना निगदितम् – विश्वसृष्टेरितिहासः पुराणम् अर्थात् सम्पूर्णस्य विश्वस्य

---

[१] *पुराणविभागः(सहायकाचार्यः), श्रीसोमनाथसंस्कृतविश्वविद्यालय-सञ्चालित कोलेज, वेरावलम्, Email-pankaj.yatkrupa@yahoo.com, Mo.9879329898*

[२] *अमरकोशः ३/१/७७*

[३] *पा. सू. ४/३/२३*

[४] *निरुक्तम् – ३/९/३४*

इतिहासः यत्र वर्णितः तत् पुराणम् ।अनेन प्रकारेण विविधग्रन्थानां माध्यमेन पुराणशब्दस्य व्युत्पत्तिलभ्यार्थः प्रतिपादितोऽस्ति। पौराणिकाः रसिकाः भावुकाः भवन्ति। अतः श्रीमद्भागवते उक्त यत्

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्।

पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः।[५]

वेदाः श्रीकृष्णवाक्यानि ब्रह्मसूत्राणि चैव हि।

समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम्॥[६]

तुलसीकाननं यत्र यत्र पद्मवनानि च।

पुराणपठनं यत्र तत्र सन्निहितो हरिः।[७]

यथा निर्दिर्ष्टचतुर्भिः धर्मशास्त्रीया चर्चा पुष्टा एवं प्रमाणिता भवति। तद्वत् विविधैः मन्त्रानुगुणसम्भावितश्लोकैः विषयोऽयं सुस्पष्टो जायते। यथा तुलसीकाननेन, पद्मवनेन च भगवतः समुपस्थितिः प्रतीयते इति यथा प्रकृतौ विद्यमानेषु सर्वेषु पदार्थेषु पञ्चमहाभूतेषु च सर्वेषां समानाधिकारो वर्तते तद्वत् पुराणाध्ययने श्रवणे, पठने च समेषां समानाधिकारोऽस्तीति व्यासवचनानामध्ययनेन स्वतः प्रतीयते। महर्षिणा वाल्मीकिना महर्षिणा बादरायेण च निजग्रन्थेषु न क्वापि न कोऽपि अवरोधः दर्शितः श्रावितः उट्टङ्कितो वा विद्यते। भगवता वेदव्यासेन स्वनामधन्येन जगति सर्वेऽपि जीवाः जना लक्षिताः। तेषां समेषां जीवनशैलीं विलाक्य आवश्यकतानुगुणं देशकालौ सङ्कीर्त्य तत्तद् विषयाः गुम्फिताः उपस्थापिताश्च यत्र सर्वेऽपि समाजिकाः मह्यं विषयोऽस्ति मह्यं विषयोऽस्तीति समुद्घोषयन्ति। सर्वेषां जनानां पुराणादरोऽयं दृष्टवैव प्रतीयते यत् सर्वेऽपि पुराणपिपठिषवः सन्ति। मनुना स्वस्मृतौ यत् **धृतिः क्षमा दमो स्तेयः शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधः दशकं धर्मलक्षणम्॥**[८] इमानि धर्मस्य लक्षणानि प्रतिपादितानि तत्र एकं एकं लक्षणमादाय भगवता वेदव्यासेन पुराणोपपुराणेषु नैकाः कथाः नैके प्रसङ्गाश्च सच्चरितमाध्यमेन उपनिबद्धाः सन्ति। अनेनाधारेणैव **व्यासोच्छिष्टं जगत् सर्वमिति** वचनं प्रसिद्धमस्ति। प्रमेयस्य सिद्धिः प्रमाणैर्भवति। प्रमाणशून्यः विचारवादः सिद्धान्त अप्रामाणिकः भ्रान्तः विनेश्वरो हेयश्च प्रतीयते कथ्यते च। यथा रूपज्ञानाय चक्षुषः आवश्यकता गन्धाय घ्राणम्, शब्दाय श्रोत्रम्,रसाय रसना, स्पर्शाय त्वक्, सुख-दुःखाभ्यां मनः एतानि तत्तज्ज्ञातुमावश्यकं तद्वदनुमेयप्रकृत्याः परमाण्वादीनां ज्ञानाय हेत्वाभासे अनाधृतस्य व्यभिचारादिदोषशून्य व्यापितज्ञानस्य अथवा व्याप्य हेतौ आधृतमनुमानमपेक्षितं वर्तते। तथैव ब्रह्मधर्मादि- अतीन्द्रियम् अनुमेयपदार्थज्ञानं प्राप्तुं स्वतन्त्रं शब्दप्रमाणमपेक्षितं विद्यते। यथा

---

[५] *भा.पु. १/१/३*

[६] *तत्त्वार्थदीपनिबन्धः अ १/३*

[७] *मा.पु. अ-१/७*

[८] *मनु.स्मृति. अ २/१०*

संसारे पित्रोः ज्ञानाय सम्बोधनाय पुत्राय माता-पिता-आदि-शब्दज्ञानमावाश्यकं विद्यते। न्यायालयेष्वपि साक्षिणां शब्दप्रमाणाधारेण निर्णया भवन्ति। एतेभ्यः सर्वेभ्यः प्रमाणेभ्यो **निःश्रेयसाय लोकस्य धन्यं स्वस्त्यनं महत्तदिदं ग्राहयामास सुतमात्मवतां वरम्। सर्ववेदेतिहासानां सारं सारं समुद्धृतमिति॥**[९] वैदिकशब्दप्रमाणं विलक्षणं एव प्रतीयते वर्तते च। कारणं लोके न क्वापि शब्दाः स्वतन्त्रप्रमाणेन ख्याताः सन्ति। ते प्रत्यक्षानुमानप्रमाणाधृतेन विलसन्ति। दोषशून्यं प्रत्यक्षादिप्रमाणधृतसमाहितनिर्दोषाप्तवक्तुः शब्दप्रामाण्यमेव तत्र भवति। किन्तु अपौरुषेयमन्त्रब्राह्मणरूपः वेदस्तु सदा प्रमाणरूप एव वर्तते। शब्दस्य प्रामाण्यं सर्वत्र मान्यं तस्याप्रामाण्यमेव वक्तुः भ्रमप्रमादादिदोषेष्वाश्रितं भवति। अनया चर्चया वेदाः अनादिभूताः नित्याश्च सन्ति। तदस्ति कथनार्कभूतं तत्त्वं सत्त्वं च। मनुः व्यासः जैमिनिप्रभृतिभिः ऋषिभिः तथा स्वयं वेदो नारायणः साक्षादर्थाद्वेदनारायणेनापि वेदवाणी नित्यास्ति इति कथितं वर्तते। **वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे।**[१०] **।अत एव स नित्यत्वम्।**[११] **वाचा विरूप नित्यया।**[१२] **औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः।**[१३] वाक्यापदीयानुसारेण प्रत्येकं ज्ञानेन सह सूक्ष्मरूपेण शब्दस्याश्रयो भवति। यः कोऽपि विचारको यस्यां कस्यामपि भाषायां विचारं कर्तुं शक्नोति तत्र शब्दाः स्युरेव। **न सोऽस्ति प्रत्ययो लोको यः शब्दानुगमादृते।**[१४] जानाति इच्छति करोति च। अनेनाधारेण क्रमेण वा ज्ञानेन इच्छा, इच्छया कर्म भवति। यथा **ज्ञानजन्या भवेदिच्छा इच्छाजन्या भवेत् कृतिः।** अतः सृष्टिनिर्माणावसरे सर्वज्ञेश्वरायापि ज्ञानं (विचारः) तत इच्छा ततश्च कर्मावलम्बनं कृतं स्यात्। तदर्थमेव प्रोच्यते स तु सङ्कल्पशक्त्या सङ्कल्पमात्रेण सर्वं कर्तुं समर्थः किन्तु तस्मिन् सङ्कल्पे ततश्च करणे ताः तिस्रः शब्दशक्तयः स च त्रिविधो क्रमः क्रियायागतः। जानातीच्छति करोतीति च।

वेदानामुपादेयता-

यस्य निःश्वसितं वेदाः तस्य परमात्मनः निःश्वासभूताः वेदाः सन्ति। येषामाविर्भावस्तपसा अविच्छिन्नज्ञानधारया स्वतो ते प्रस्फूटिताः जाताः सन्ति। तेनैव वेदज्ञानेन मानवः धर्माधर्मम्, आवास-निवासम्, कर्तव्याकर्तव्यम्, आचारविचारम्, न्यायान्यायम्, सत्यमसत्यम्, ज्ञानमज्ञानम्, पुण्यमपुण्यम्, कर्माकर्म ज्ञातुं समर्थः शक्तश्च भवति। संस्कृतेः निर्णयं कर्तुमपि तेनैव ज्ञानेन अनुभवेन च प्रवृत्तो भवति। प्रत्यक्षानुमानात्मकं ज्ञानं प्रमाणैः अगम्यमज्ञातं तत्तत्त्वं ज्ञातुं ज्ञापयितुं च वेदानामावश्यकता-**प्रत्यक्षैणानुमित्या वा यस्तूपायो न विद्यते। एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता॥** इति साबरभाष्ये

---

[९] *भा.पु १-३-४१- ४२*

[१०] *मनु.स्मृ-१-२१*

[११] *ब्र.सू.१-३-२९*

[१२] *ऋक् ८-७५-६*

[१३] *जै.सू.१-५*

[१४] *वाक्यपदीयम्१-१२३*

निगदितमस्ति। स्वर्गकामो यजेत, कलञ्ज न भक्षयेत्। इत्यादिवेदवाक्यैः प्रतिपादिविहितप्रवर्तनं निषिद्धनिवर्तनं तर्केण निराकर्तुं न शक्यते। सन्ध्योपासनादीनि कर्माणि धर्मजनकानि तथा सुरापानादीनि कर्माणि निषिद्धकर्माणि अधर्मोत्पादकानि कर्माणि एतेषां सिद्धिः वेदवाक्यातिरिक्ता न भवति। प्रत्यक्षप्रमाणेन च तदवगन्तुं न शक्यते। वेदेषु विश्वासोऽस्ति यस्य वेदस्य प्रामाणिकतां यः स्वीकरकोति सोऽस्ति आस्तिकः। वेदान् वेदस्य प्रमाणानि च यः न स्वीकरोति सोऽस्ति नास्तिकः। नास्तिको वेदनिन्दकः एतदपि प्रसिद्धमिति अमरकोशे। वेदस्य स्वाध्यायः ये आस्तिकाः सन्ति तैः वेदस्य स्वाध्यायकर्म स्वीकृतम्। शतपथब्राह्मणे लिखितम् यत्–

यावन्तं ह वै इमां पृथिवीं वित्तेन पूर्णां ददल्लोकं जयति त्रिभिस्तावन्तं जयति
भूयांसश्च अक्षय्यञ्च य एवं विद्वानहरहः स्वाध्यायमधीते तस्मात् स्वाध्यायोऽध्येतव्यः।
स्वाध्यायान्मा प्रमदः स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।
वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्। इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते॥[१५]
ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च।
मातापितरौ चास्य स्वर्गे लोके महीयते।[१६]
योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥[१७]

अधिकारः

स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा।
कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह॥[१८]

सर्वेषां धार्मिकग्रन्थानामध्ययने सर्वोषामधिकारः वेदान् विहाय। द्विजेतरः वेदाध्ययनेनाधिकारं धारयति। तस्य मुख्यं कारणं वेदशास्त्रस्याज्ञा एव। विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि। वेदकोषस्य कोशाध्यक्षो द्विज एव। द्वितीयं च तत् -उपनीयः गुरुः शिष्यं वेदमध्यापयेद् विधिम्। गुरुः शिष्यस्योपनयनसंस्कारं कृत्वा वेदारम्भसंस्कारं च आचरय्य वेदं पाठयितुं क्षमो भवति।

---

[१५] *मनु.१२/१०२*
[१६] *महाभाष्यम् १-१-१*
[१७] *मनु.२ -१६८*
[१८] *भा.पु.१-४-२५*

अष्टवर्षं ब्राह्मणमुपनयेत् गर्भाष्टमे वा।
एकादशवर्षं राजन्यं द्वादश वर्षं वैश्यम्॥[१९]

येषामुपनयनसंस्कारः न सञ्जातः तेषां तत एव वेदप्रवेशे निषेधः स्वतः स्पष्टो भवति। शास्त्रेषु विश्वासः येषां नास्ति। तादृशेषु ईश्वरः दयापात्रो भूत्वा कथयति।

न देवा दण्डमादाय रक्षन्ति पशुपालवत्।
यं तु रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम्॥[२०]

वैदिकधर्मः संस्कृतिश्च–

वैदिककाले अधिकांशः सर्वेषां समयः स्वाध्याये अध्ययनाध्यापने च व्यतीतः अभवत्।

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा॥[२१]

तस्य प्रसिद्धं श्लोकोक्तं दृष्टान्तं वर्तते। कः कीदृशः तस्य परिचयः स कथं समयह्यापनं करोति तेन स्पष्टं सिद्धं च भवति। केचन पुरा गृहास्थाश्रमेऽपि ऋक् यजुरादि सूक्तैः भगवदुपासनं अकुर्वन्। यदानीं कर्मकाण्डाश्रयेण स्वयमुत्पन्ननिवारभक्षणेन जीवनं अयापयन्। बालोऽपि अश्वमेध, वाजपेय, राजसूयादियज्ञानामुपक्रमं कण्ठस्थीकृत्य अवदत्। यज्ञप्रक्रिया कण्ठस्थासीत्तदानीम्। नद्युपवनेषु उषित्वा स्वच्छतापूर्वकं प्रकृतिप्रणयेन पुरःसरं स्वाध्यायकर्म अकुर्वन्। विपत्तीनामुपशमनाय तदानीं देव्युपासना अभवत्। अनेन तत्काले सत्त्वगुणवृद्धिः अजायत।

वेदाध्ययनेन अपि पुराणाध्ययने सर्वेषां समानाधिकारः।

वेदोपनिषदां साराज्जाता भागवती कथा।[२२] वेदेषु मन्त्राध्ययने मन्त्रोच्चारे सर्वषामधिकारो नास्ति। किन्तु वदोपनिषदां कथानकं प्रतिपाद्यविषयं ज्ञातुं पठितुं सर्वषामधिकारो वर्तते पुराणाध्ययने। वेदेषु ये सिद्धान्ताः प्रतिपादिताः उपनिषत्सु ऋक्क्षु याः कथाः निबद्धाः तासाञ्च विस्तारः पवित्रैः चरित्रैः पुराणोपपुराणेषु कृतः विद्यते। मातृदेवो भव तदर्थं तच्चस्पष्टीकर्तुं मदालसाचरित्रं पुराणे प्रसिद्धम्। सत्यकामजाबालस्य कथा वेदोपनिषदत्सु मन्त्ररूपेण वर्तते। तर्हि पुराणेषु सैव कथा श्लोकैः निबद्धा वर्तते। पितृदेवो भव तत् स्पष्टीकर्तुं मर्यादापुरुषोत्तमः रामः दशरथस्य वचनपालनाय वनं निर्गच्छति। आचार्यदेवो भव एतदर्थं पुराणेषु नैकाः कथाः नैके प्रसङ्गाः सन्ति। अतिथिदेवो भव तदर्थं भागवते कथितं

---

[१९] *पारस्करगृह्यसूत्रम् २-२-१/३*

[२०] *महा. भीष्म. प. ४८/४२*

[२१] *हितो. ३२.*

[२२] *प. पु. भा. मा. २/६७*

गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि।
यदि निर्यान्ति ते नूनं फेरुराजगृहोपमाः॥[२३]

ईशोपनिषदि यः प्रमथः मन्त्रः ख्यातिं गतः सोऽपि भागवते प्राप्यते यथा –

आत्मावास्यमिदं विश्वं यत्किञ्चज्जगत्यां जगत्।
तेन त्यक्तेन भुञ्जिथाः मा गृधः कस्यस्विद्धनम्॥[२४]

सत्यं वद एतद् वेदवचनं सिद्धं कर्तुं पुराणे भागवते सत्यावादी राजाहरिश्चन्द्रस्य कथानकं नवमे स्कन्धे आगच्छति। धर्मं चर एतदर्थं रामायण महाभारत- गीता- पुराणादीनि शास्त्राणि सन्ति। वेदोपनिषत्सु द्वासुपर्णा सयुजा सखायः एतत् प्रतिपादयितुं श्रीमद्भागवतमहापुराणे चतुर्थस्कन्धे पुरुञ्जनपञ्चाध्यायी विद्यते यत्र पुरञ्जनः अज्ञातः तेनैव स्वरूपेण विराजते। **अजामेकां लोहितशुक्लकृष्णां मन्त्रोऽयम् उपनिषत्सु तु वर्तते एव किन्तु वायुपुराणेऽपि अयं श्लोको वर्तते।**[२५] हिरण्मयेन पात्रेण इत्यस्यापि उदाहरणं पृथुचरित्रे भागवतमहापुराणे वर्तते। यजुर्वेदे पुरुषसूक्तं सर्वेषां कृते बुद्धिगम्यं नास्ति, तेषां चाधिकारे नागच्छति अपि तु भागवतमहापुराणे विराट्पुरुषवर्णनं द्वितीयस्कन्धे तेनैव भावेन प्रतिपादितं विद्यते। तत्र सर्वेषामधिकारः वर्तते। यदा वेदेषु स्त्रीणां वैश्यानां शूद्राणां सर्वेषां समानाधिकारः वैदिकं ज्ञानं प्राप्तुं नास्ति। किन्तु गीतायां भगवताप्रोक्तम्-

चातुर्वण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्॥[२६]

अनेन श्लोकेन गुणकर्माधारेण वर्णाश्रमविभाजनं बह्वीनां समस्यानां समाधानं कृतं विद्यते। वेदाध्ययनं भवतु वा शास्त्राध्ययनं भवतु मनुष्यस्य चान्तिमं लक्ष्यं तु परमागतिरेवास्ति तदर्थं गीतायां भगवता प्रोक्तं **स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥**[२७] यो भगवद्भक्तो भवति तस्य विनाशो न भवति। वेदे वा पुराणे यस्य संशयः स विनश्यति यथा भगवता कथितं संशयात्मा विनश्यति। किन्तु स संशयः गुरोरग्रे शास्त्राणां पुरस्ताद् प्रस्थाप्यते चेत् निःसंशयो भूत्वा अन्ते स तरिष्यति। रामायणं – महाभारतपुराणोपपुराणानि धर्मशास्त्राणि वेदानां भाष्यभूतानि सन्ति। मन्त्राणां सिद्धान्तानां फलश्रुतिरूपाणि शास्त्राणि सन्ति। शुक्लयजुर्वदस्य कर्मकाण्डे प्रसिद्धः एकः मन्त्रः वर्तते।

---

[२३] *भा.पु.८-१६- ७*

[२४] *भा.पु- ८-१-१०*

[२५] *वायु.पु.१-१०-२३*

[२६] *गीता-४-१३*

[२७] *गीता-९-३२*

चत्वारिश्रृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य।
त्रिद्धा बद्धो वृषभो रोरवीति महो देवो मृर्त्याँ आविवेश॥[२८]

तस्येव ज्ञानाय भागवते अष्टमे स्कन्धे षोडशेऽध्याये यथा-

नमो द्विशीर्ष्णे त्रिपदे चतुः श्रृङ्गाय तन्तवे।
सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः॥[२९]

यदा कश्यपऋषिः अदित्यै पयोव्रतोपदेशं विधिं च कथयति तत्रावसरे नारायणस्मरणे आगच्छति। यथा ऋक्-यजु-साम-अथर्वाख्येन चत्वारः वेदाः सन्ति। तथैव वेदाः, ब्राह्मणानि, आरण्यकानि, उपनिषदश्च चत्वारो भागाः। तद्वदेव तज्ज्ञातुं वेदान् ज्ञातुं वेदानां चतुर्भागाञ्च ज्ञातुं रामायणम्, महाभारतम्, पुराणोपपुराणानि, धर्मशास्त्राणि च एतानि चत्वारि अङ्गानि सन्ति।

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति॥[३०]

संशोधनपत्रस्य के के लाभाः

- अनेन शोधपत्रेण वेदान् शास्त्राणि च प्रति श्रद्धावृद्धिर्भविष्यति।
- देशकालधर्मस्य ज्ञानं भविष्यति।
- सर्वे अपि अधिकारपूर्वकं शास्त्रेषु प्रवेशमेष्यन्ति।
- शास्त्राध्ययनेन मानवत्त्वं चिरं स्थास्यति।
- सनातनधर्मस्य बोधो भविष्यति।
- वेदानां जटिलं ज्ञानं पुराणैः शास्त्रैश्च सारल्येन ज्ञास्यति।
- शास्त्राणां समाजे प्रतिष्ठां वर्धयिष्यते।
- वेदाध्ययनस्याधिकारः शास्त्रैः सर्वेषां भवति।

---

[२८] *ऋग्.४.५८.३*

[२९] *भा.पु. ८-१६-३१*

[३०] *महा.आदि.१/१/२६७*

सन्दर्भग्रन्थसूचिः

क्रमः	ग्रन्थनाम	सम्पादकः	प्रकाशनस्थान्	प्रकाशनवर्षम्
१	मनुस्मृतिः	श्री. पं. गोपालशास्त्री नेने	चौखम्भा संस्कृत संस्थान	२००८
२	बह्मसूत्रम्	पं. रामकृष्ण त्रिपाठी	चौखम्भा संस्कृत सिरीज वाराणसी	२००७
३	ऋग्वेदः	स्वामी गङ्गेश्वरानन्दजी	स्वामी गङ्गेश्वरानन्दजी आश्रम अहमदाबाद	२००४
४	जैमिनिधर्मसूत्रम्	बदरीनाथ शुक्ल	मातीलाल बनारसी दास	२०१७
५	वाक्यपदीयम्	भर्तृहरिः	चौखम्भा संस्कृत सिरीज वाराणसी	२००६
६	अमरकोशः	पं. केशव मिश्र शुक्ल	चौखम्भा विद्या प्रतिष्ठान वाराणसी	२००८
७	शतपथब्राह्मणम्	Maitreyee dash pande	New bharatiya book corporation delhi	२००८
८	महाभाष्यम्	चारूदेव शास्त्री	मोतीलाल बनारसी दास	२०१२
९	पारस्करगृह्यसूत्रम्	डॉ. वेदपाल	सत्यार्थ प्रकाशन न्यास हरियाणा	२००८
१०	पद्मपुराणम्	द्वारकादास भट्ट जयेश रावल	गीताप्रेस गारखपुरम्	२००३
११	तैत्तरियोपनिषद्	आ. केशवलाल वी. शास्त्री	चौखम्भा संस्कृत प्रतिष्ठान	२०१५
१२	ईशावास्योपनिषद्	आ. केशवलाल वी. शास्त्री	चौखम्भा संस्कृत प्रतिष्ठान	२०१५
१३	भागवतपुराणम्	द्वारकादास भट्ट जयेश रावल	गीताप्रेस गारखपुरम्	२००३
१४	वायुपुराणम्	शिवजीत सिंह	चौखम्भान विद्याभवन वाराणसी	२०२०
१५	श्रीमद्भगवद्गीता	-	गीताप्रेस गोरखपुर	२०१३
१६	महाभारतम्	पं. रामनारायदत्त शास्त्री	गीताप्रेस गोरखपुर	२००९

~~~~~~~~~~
~~~~~~~~~~